# A-I/1/1270/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सभालक्षणं किम्?
2. "समाह्वयः" इत्यनेन किमभिधीयते?
3. व्यवहारलक्षणं किम्?

**अथवा**

सभासदः कीदृशाः भवेयुः?

4. के पूगाः?
5. अर्थशास्त्रस्यापरं नाम किम्?
6. कः स्थानासेधः?

**अथवा**

कः प्रतिभूः?

7. कानि दिव्यानि? नामानि लिखत।
8. प्रमाणं कतिविधम्?
9. लौकिकं लेख्यं कतिविधम्?

**अथवा**

भोगः कतिविधः?

10. दिव्यप्रमाणं कुत्र प्रयोजयेत्?
11. के सप्तमारुतः?
12. अग्निविधेः कति मण्डलानि भवन्ति?

**अथवा**

किं फालम्?

13. कः द्वामुष्यायणः?

14. दायशब्दस्य कोऽर्थः?

15. एकादशरुद्रनामानि लिखत।

**अथवा**

कः औरसपुत्रः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कूटसाक्ष्ये दण्डविधानं निरूपयत।

17. घटविधिं विशदं विवेचयत।

**अथवा**

विभागकालान् स्पष्टयत।

18. दत्तकग्रहणविधिं लिखत।

19. कोशविधिं स्पष्टयत।

**अथवा**

साक्षीसन्देहनिर्णयं प्रतिपादयत।

20. प्रमाणभेदान् विलिख्य कुत्र कस्य प्रामाण्यम्? वर्णयत।

**अथवा**

विभागानन्तरोत्पन्नपुत्रस्य विभागं स्पष्टयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः" इत्यस्य व्याख्या कार्या।

**अथवा**

सर्वदिव्यसाधारणविधिमालोचयत।

**अथवा**

दायस्वरूपं सविस्तरमुपस्थापयत।

# A-I/2/1271/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## धर्मशास्त्रम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. मीमांसादर्शनस्यापरं नाम किम् ?

2. अथातो धर्मजिज्ञासा इत्यत्र अथशब्दार्थ: क: ?

3. धर्मलक्षणं किम् ?

**अथवा**

आर्थीभावनालक्षणं लिखत।

4. साधनाकांक्षायां कस्यान्वय: ?

5. वेद: कतिविध: ?

6. उत्पत्तिविधे: लक्षणं लिखत।

**अथवा**

दध्नाजुहोतीत्यत्र क: विधि: ?

7. श्रुति: कतिधा ?

8. वाक्यादिभ्य: लिंगस्य बलवत्वे किमुदाहरणम् ?

9. किं वाक्यम् ?

**अथवा**

नञर्थस्य कुत्रान्वय: ?

10. प्रकरणलक्षणं किम् ?

11. स्थानं कतिविधम् ?

12. समाख्या कतिधा ?

**अथवा**

प्रयोगविधे: लक्षणं किम् ?

13. कः अर्थक्रमः ?

14. के मन्त्राः ?

15. अधिकारविधेः लक्षणं किम् ?

**अथवा**

पदार्थक्रमयोः कः बलवान् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. सपदकृत्यं धर्मलक्षणं प्रतिपादयत।

17. आर्थिभावनास्वरूपं स्पष्टयत।

**अथवा**

विनियोगविधेः स्वरूपं लिखत।

18. प्रयोगविधिस्वरूपं विशदयत।

19. सोदाहरणं प्रकृतिविकृतिलक्षणमुपस्थापयत।

**अथवा**

सभेदं समाख्यालक्षणं निरूपयत।

20. नामधेयलक्षणं सप्रयोजनमुपपादयत।

**अथवा**

प्रयाजान् निरूपयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सभेदमर्थवादस्वरूपं प्रतिपादयत।

**अथवा**

सलक्षणं विधेः सहकारिप्रमाणानि लिखत।

**अथवा**

सभेदं विधिस्वरूपं प्रतिपादयत।

# A-I/3/1272/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## धर्मशास्त्रम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. दायभागग्रन्थ: कस्य ग्रन्थस्यान्तर्गत: ?
2. विभागलक्षणं किम् ?
3. स्वत्त्वलक्षणं किम् ?

**अथवा**

जिमूतवाहनमतानुसारं पितृधनविभागस्य कालद्वयं किम् ?

4. अर्जनं नाम किम् ?
5. पितुरनन्तरं क: पितु: धनमशेषतो गृह्णीयात् ?
6. ऋत्विज: लक्षणं किम् ?

**अथवा**

गान्धर्वविवाहस्य लक्षणं किम् ?

7. समांशहारिणी का ?
8. निबन्धलक्षणं किम् ?
9. पित्रो: जीवतो धनविभागेऽनीशा: के ?

**अथवा**

विवाह: कतिविध: ? के च ते ?

10. एकपुत्र: क: विचारित: ?

**अथवा**

के अदायदाबान्धवा: ?

11. स्त्रीधनं कतिविधं ? तानि च कानि ?

12. अन्वाधेयं किम् ?

13. भागद्वयं कस्य भ्रातृविषयम् ?

14. पुन्नामनरकव्यावर्तकः कः ?

15. कामजाः पुत्राः के ?

**अथवा**

कयोरभावे पुत्राणां विभागः संप्रदर्शितः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वत्वस्य लौकिकालौकिकत्वविचारं कुरुत।

17. असवर्णभ्रातृविभागं निरूपयत।

**अथवा**

दायभागपदस्य निरूढत्वं यथाग्रन्थं विचारयत।

18. जीमूतवाहनदिशा अप्रजस्त्रीधनाधिकारक्रमं निरूपयत।

19. विभागान्तरागतविभागं यथाग्रन्थं प्रतिपादयत।

**अथवा**

विद्याधनमहत्वं यथाग्रन्थं प्रतिपादयत।

20. ग्रन्थकर्तुः जीमूतवाहनस्य कालकृतिग्रन्थादिकं विशदय।

**अथवा**

जीमूतवाहनदिशा पितृधनविभागकालान् उल्लिखत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सवर्णभ्रातृणां धनविभागनिरूपणं ग्रन्थोक्तदिशा प्रतिपादयत।

**अथवा**

स्त्रीधनविभागं निरूपयत।

**अथवा**

विभाज्याविभाज्यधननिरूपणं ग्रन्थोक्तदिशा प्रतिपादयत।

# A-I/4/1273/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. "दण्डनीतिः" शब्दस्य कोऽर्थः?

2. लोकायतस्यापरं नाम किम्?

3. का आन्वीक्षिकी विद्या?

**अथवा**

कतिविधः विनयः?

4. कौटिल्यमतानुसारे संख्यानामभ्यासः कदा कुर्यात्?

5. इन्द्रियजयं कथं कुर्वीत?

6. का अर्थोपधा?

**अथवा**

कौटिल्यमतेन "अर्थ एव प्रधानम्" अस्ति न वा?

7. विनयाधिकरणे कति अध्यायाः सन्ति?

8. कः अरालिकः?

9. अमात्यनियुक्तिविषये कौणपदन्तस्य मतं किम्?

**अथवा**

के तीक्ष्णाः?

10. लुब्धवर्गः कः?

11. इङ्गितशब्दस्य कोऽर्थः?

12. मन्त्रिपरिषदं कति अमात्यान् कुर्वीतेति मानवाः?

**अथवा**

दूतः कतिविधः?

13. कानि ज्ञानेन्द्रियाणि ?

14. के मातृबान्धवाः ?

15. योगशब्दस्य कोऽर्थः ?

**अथवा**

कः उपांशुदण्डः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आश्रमधर्मान् लिखत।

17. “वृद्धसंयोगः” इति प्रकरणस्य किं वैशिष्ट्यम् ? लिखत।

**अथवा**

दुर्गनिर्माणविधिं स्पष्टयत।

18. दूतनियुक्तिविषये विचारमालोचयत।

19. गूढपुरुषप्रणिधिं लिखत।

**अथवा**

राज्ञः कर्त्तव्यनिर्णयमालोचयत।

20. कौटिल्यमतानुसारं विनयाधिकरणस्य किं वैशिष्ट्यम् ? लिखत।

**अथवा**

मन्त्रणाधिकारं निरूपयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. कस्य अप्रणीत्येसति मात्स्यन्यायमुद्भावयति प्रकरणप्रसंगानुसारं विवृणुत।

**अथवा**

कौटिल्यमतानुसारं कृत्याकृत्यपरीक्षणमालोचयत।

**अथवा**

अमात्यनियुक्तिविषये विशदं विवेचनं कुरुत।